श्रीदत्तात्रेयप्रार्थनास्तोत्रम् अथवा घोरकष्टोद्धारणस्तोत्र

{॥ श्रीदत्तात्रेयप्रार्थनास्तोत्रम् अथवा घोरकष्टोद्धारणस्तोत्र ॥}

श्रीपाद श्रीवल्लभ त्वं सदैव । श्रीदत्तास्मान्पाहि देवाधिदेव ॥

भावग्राह्य क्लेशहारिन्सुकीर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥ १॥

त्वं नो माता त्वं पिताप्तोऽधिपस्त्वम् । त्राता योगक्षेमकृत्सद्गुरुस्त्वम् ॥

त्वं सर्वस्वं नोऽप्रभो विश्वमूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥ २॥

पापं तापं व्याधिमाधिं च दैन्यम् । भीतिं क्लेशं त्वं हराशु त्वदन्यम् ॥

त्रातारं नो वीक्ष्य ईशास्तजूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥ ३॥

नान्यस्त्राता नापि दाता न भर्ता । त्वत्तो देव त्वं शरण्योऽकहर्ता ॥

कुर्वात्रेयानुग्रहं पूर्णराते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥ ४॥

धर्मे प्रीतिं सन्मतिं देवभक्तिम् । सत्संगाप्तिं देहि भुक्तिं च मुक्तिम् ।

भावासक्तिं चाखिलानंदमूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥ ५॥

Stotram Digitalized By Sanskritdocuments.org

श्लोकपंचकमेततद्यो लोकमङ्गलवर्धनम् ।

प्रपठेन्नियतो भक्त्या स श्रीदत्तप्रियो भवेत् ॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं

श्रीदत्तात्रेयप्रार्थनास्तोत्रं सम्पूर्णम् ॥

http://www.shrivasudevanandsaraswati.com/stotratm

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Dattatreya Prarthana Stotram (Ghorakashtodharana Stotram) Lyrics in Devanagari PDF
% File name : dattaprArthanAghorakaShToddhAraNa.itx
% Location : doc_deities_misc
% Author : shrivasudevanandsaraswati Tembe swami
% Language : Sanskrit
% Subject : philosophy/hinduism
% Transliterated by : http://www.shrivasudevanandsaraswati.com/
% Latest update : December 5, 2008
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.

Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website